# पातुं न प्रथमं व्यवस्यति... इत्यादिश्लोकव्याख्या

कार्तिक-दोलुइः

**भूमिका** अस्मिन्निति विचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयः द्वित्रा पञ्चषा वा महाकवित्वेन गण्यन्ते इति वचनात् ज्ञायते यद् जगत्यस्मिन् पञ्च महाकवयः बभूवुः। तेषु कालिदासः अन्यतमः। तस्य सप्तसु अमराकृतिषु प्रामुख्यं स्थानं भजते अभिज्ञानशाकुन्तलम् इति नाटकम्। आलङ्कारिकैः एतन्नाटकं कालिदासस्य सर्वोत्कृष्टकृतित्वेन स्वीक्रियते। नाटकेऽस्मिन् भावगम्भीराः चत्वारः श्लोकाः वर्तन्ते। तेषु आन्यतम्यं स्थानं भजते पातुं न प्रथमं व्यवस्यति.... इत्यादिश्लोकः।

**प्रसङ्गः** शकुन्तला यदा पतिगृहं गच्छति स्म, तदा कण्वः वनदेवतां प्रति एतं श्लोकं प्रोक्तवान्। शकुन्तलायाः जन्मनः परं तस्याः अरण्यम् एव आत्मीयः आसीत्। पुनः अरण्ये एव पालिता शकुन्तला। अतः तपोवनवियोगसमये महर्षिः कण्वः शकुन्तलायाः कृते आशिषपूर्वकम् आज्ञां प्रार्थितवान्।

**श्लोकः**

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥ इति।

**अन्वयः** या युष्मासु अपीतेषु प्रथमं जलं पातुं न व्यवस्यति, या प्रियमण्डना अपि भवतां स्नेहेन पल्लवं न आदत्ते, वः आद्ये कुसुमप्रसूतिसमये यस्याः उत्सवः भवति सा इयं शकुन्तला पतिगृहं याति । सर्वैः अनुज्ञायताम्॥ इति।

**अन्वयार्थः** या शकुन्तला, युष्मासु भवत्सु वृक्षेषु, न विद्यते पीतं येषां ते, तेषु अपीतेषु अपीतलेषु असिक्तेषु इति यावत्। प्रथमं पूर्वमेव जलं पानीयमेव पातुं न व्यवस्यति न यतते नेच्छति वा, किञ्च या शकुन्तला प्रियाणि मण्डनानि यस्या सा प्रियमण्डना, भूषणप्रिया अपि, भवतां स्नेहेन, अनुरागेण, युष्माकं पल्लवं नवदलं किसलयमपि, न आदत्ते न गृह्णाति, वः युष्माकं, आद्ये प्रथमे, कुसुमानां प्रसूतिः तस्याः समये कुसुमप्रसूतिसमये प्रथमकलिकास्फुटनकाले, यस्याः उत्सवः सहः परमानन्दः, भवति जायते, सा युष्मासु एवंविधवात्सल्यातिशायिनी, इयं शकुन्तला पतिगृहप्रस्थानसमये युष्मान् आमन्त्रयितुम् उपस्थिता।

सा इयं पतिगृहं भर्तृभवनं याति, सर्वैः सकलैः एषा अनुज्ञायताम् अनुमन्यताम् आज्ञाप्यताम्। अतो भवद्भिः सम्भूय पतिगृहप्रयाणानुरूपशुभाशीर्वचनवर्धितं स्नेहानुरूपं चानुमोदनं क्रियतामिति भावः।

**छन्दः** पद्यमिदं शार्दूलविक्रीडितवृत्तगुम्फितम्।